## Concluding Prayers

वीर मारुति गम्भीर मारुति

धीर मारुति अति धीर मारुति

गीत मारुति सङ्गीत मारुति

दूत मारुति रामदूत मारुति

भक्त मारुति परमभक्त मारुति

वीर मारुति गम्भीर मारुति (३)

**vīra Māruti gambhīra Māruti**
**dhīra Māruti ati dhīra Māruti**
**gīta Māruti saṅgīta Māruti**
**dūta Māruti rāmadūta Māruti**
**bhakta Māruti paramabhakta Māruti**
**vīra Māruti gambhīra Māruti (3)**

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

**Om namaste astu Bhagavanviśveśvarāya Mahādevāya Tryambakāya Tripurāntakāya Trikālāgnikālāya Kālāgnirudrāya Nīlakaṇṭhāya Mṛtyuñjayāya Sarveśvarāya Sadāśivāya Śrīmanmahādevāya namaḥ ||**

ॐ स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥

**Om svasti prajābhyaḥ paripālayantāṁ**
**nyāyyena mārgeṇa mahīṁ mahīśāḥ ।**
**gobrāhmaṇebhyaḥ śubhamastu nityaṁ**
**lokāḥ samastāḥ sukhino bhavantu ।।**

काले वर्षतु पर्जन्यः । पृथिवी सस्य शालिनी ।
देशोऽयं क्षोभरहितः । ब्राह्मणाः सन्तु निर्भयाः ॥

**kāle varṣatu parjanyaḥ । pṛthivī sasya śālinī ।**
**deśo'yaṁ kṣobharahitaḥ । brāhmaṇāḥ santu nirbhayāḥ ।।**

सर्वेषां स्वस्तिर्भवतु । सर्वेषां शान्तिर्भवतु ॥
सर्वेषां पूर्णम्भवतु । सर्वेषां मङ्गलं भवतु ॥

**sarveṣāṁ svastirbhavatu ।**
**sarveṣāṁ śāntirbhavatu ।।**
**sarveṣāṁ pūrṇambhavatu ।**
**sarveṣāṁ maṅgalaṁ bhavatu ।।**

सर्वे भवन्तु सुखिनः । सर्वे सन्तु निरामयाः ॥
सर्वे भद्राणि पश्यन्तु । मा कश्चिद् दुःखभाग् भवेत् ॥

**sarve bhavantu sukhinaḥ ।**
**sarve santu nirāmayāḥ ।।**
**sarve bhadrāṇi paśyantu ।**
**mā kaścid duḥkhabhāg bhavet ।**

असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय ॥

**a̲sato mā sa̲dgamaya ।ta̲maso mā jyo̲tirgamaya ।**
**mṛtyo̲rmā amṟtaṁ gamaya । ।**

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

**Om pūrṇa̲mada̲ḥ pūrṇa̲mida̲ṁ pūrṇa̲t pūrṇa̲muda̲cyate ।**
**pūrṇa̲sya pūrṇa̲mādā̲ya pūrṇa̲mevāvaśi̲ṣyate ।।**

ॐ शान्तिः शान्तिः शान्तिः ।

**Om śānti̲ḥ śānti̲ḥ śāntiḥ ।**

हरिः ॐ। श्रीगुरुभ्यो नमः। हरिः ॐ॥

**Hariḥ Om । Śrīgurubhyo Namaḥ । Hariḥ Om ।।**